## स्थे च भाषायाम् । (२०/९७८)

स्थे चोत्तरपदे भाषायां सप्तम्या अलुक् न भवति । समस्थः । विषमस्थः । कूटस्थः । [1]पर्वतस्थः । भाषायाम् इति किम् ? 'कृणोम्यारेष्ठः' (वा.सं. २.१) । 'पूर्वपदात्' (८.३.१०६/३६४३) इति षत्वम् ॥

## षष्ठ्या आक्रोशे । (२१/९७९)

आक्रोशे गम्यमाने उत्तरपदे षष्ठ्या अलुग् भवति । [3]चौरस्यकुलम् । वृषलस्यकुलम् । आक्रोशे इति किम् ? [4]ब्राह्मणकुलम् ।

[७२२] षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो[5] युक्तिदण्डहरेषु यथासङ्ख्यमलुग् वक्तव्यः । (म. भा. ३.१४६)

वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ॥

[७२३] आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति [6]चालुग् वक्तव्यः । (म. भा. ३.१४६)

अमुष्यापत्यम् आमुष्यायणः । नडादित्वात् फक् (४.१.९९/११०१) । अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका । [7]मनोज्ञादित्वाद् वुञ् (५.१.१३३/१७९८) । तथा आमुष्यकुलिका इति ।

[७२४] देवानाम्प्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः । (म. भा. ३.१४७)

[8]देवानाम्प्रियः[9] ॥

[७२५] शेपपुच्छलाङ्गूलेषु शुनः सञ्ज्ञायां अलुग् वक्तव्यः । (म. भा. ३.१४७) ।

शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः ।

[७२६] [10]दिवश्च दासे षष्ठ्या अलुग् वक्तव्यः । (म. भा. ३.१४७)

दिवोदासाय गायति[11] ॥

## पुत्रेऽन्यतरस्याम् । (२२/९८०)

पुत्रशब्दे उत्तरपदे आक्रोशे गम्यमानेऽन्यतरस्यां षष्ठ्याः अलुग् भवति । दास्याःपुत्रः, दासीपुत्रः । वृषल्याःपुत्रः वृषलीपुत्रः । आक्रोशे इत्येव, [12]ब्राह्मणीपुत्रः ॥

---

1. नास्ति ह. 2. अवरेष्ठः ह. 3. दासस्यकुलम् ब. 4. ब्राह्मणपुत्रः क. 5. परतः इत्यधिकम् ब. 6. वक्तव्यम् फ. 7. वाक्यमिदं नास्ति ब. 8. नास्ति फ. 9. मूर्खः । अन्यत्र देवप्रियः इत्यधिकम् ड. 10. वाक्यमिदं नास्ति फ. 11. दिवोदासदिवस्पतिवाचस्पतिवास्तोष्पतयः सञ्ज्ञायां अलुग्वक्तव्यः इत्यधिकम् क. 12. ब्राह्मणपुत्रः ब. क. ह.